सरित्पति:, पुं, (सरितां पति: ।) समुद्र: । इत्यमर: ।१।१०।१॥ (यथा, भागवते ।५।१७।७।
"एवं माल्यवच्छिखरान्निष्पतन्ती तत उपरतवेगा केतुमालमभि वंक्षु: प्रतीच्यां दिशि सरित्पतिं प्रविशति ॥")

सरित्वान्, [त्] पुं, (सरित: सन्त्यस्येति । सरित्+मतुप् । मस्य व: ।) समुद्र: । इति केचित् ॥

सरित्सुत:, पुं, (सरितो गङ्गाया: सुत: ।) भीष्म: । गङ्गापुत्त्रत्वात् ॥

सरितांनाथ:, पुं, (सरितां नदीनां नाथ: । अलुक् समास: ।) समुद्र: । यथा,—
"त्वं देव सरितांनाथ ! त्वं देवि सरितां वरे ।
उभयो: सङ्गमे स्नात्वा मुञ्चामि दुरितानि वै ॥"
इति प्रायश्चित्ततत्त्वे गङ्गासागरस्नानमन्त्र: ॥

सरताम्पति:, पुं, (सरितां पति: । अलुक् समास: ।) समुद्र: । इति शब्दरत्नावली ॥ (यथा, कुमारे । २ । ३७ ।
"तस्योपायनयोग्यानि रत्नानि सरिताम्पति: ।
कथमप्यम्भसामन्त: आनिष्पत्ते: प्रतीक्षते ॥")

सरिद्वरा, स्त्री, (सरित्सु वरा श्रेष्ठा ।) गङ्गा । इति हेमचन्द्र: ॥ (यथा, महाभारते ।१।९६।८।
"महाभिषस्तु तं दृष्ट्वा नदी धैर्य्याच्च्युतं नृपम् ।
तमेव मनसाध्यायन्त्युपावर्त्तत्सरिद्वरा ॥"
नदीश्रेष्ठे, त्रि । यथा, महाभारते ।१।७८।६।
"सा तमभिषमं विप्रमनुचिन्त्य सरिद्वरा ।
शतधा विद्रुता यस्माच्छतद्रुरिति विश्रुता ॥")

सरिन्नाथ:, पुं, (सरितां नाथ: ।) समुद्र: । इति राजनिर्घण्ट: ॥

सरिमा [न्] पुं, (सरतीति । सृ+"हृ-भृ-धृ-सृ-स्तृभ्य इमनिच् ।" उणा० ४।१४७ । इति इमनिच् ।) गमनम् । वायु: । इत्युणादिकोष: ॥

सरिलं, क्ली, (सलिलम् । रलयोरैक्यात् लस्य र: ।) सलिलम् । इत्यमरटीकायां भरत: ॥

सरिषप:, पुं, (सृ गतौ+अप: षुगागमश्च । तत: पृषोदरादित्वात् साधु: । इत्युणादिटीकायां उज्ज्वलदत्त: । ३ । १४१ ।) सर्षप: । इति त्रिकाण्डशेष: ॥

सरी, स्त्री, (सरि+कृदिकारादिति वा ङीष् ।) निर्झर: । इति भरतद्विरूपकोष: ॥

सरीसृप:, पुं, (कुटिलं सर्पतीति । सृप्+यङ्लुक्+पचाद्यच् ।) सर्प: । इत्यमर: ।१।८।७। (यथा, महाभारते । ३ । २ । ३ ।
"वनञ्च दोषबहुलं बहुव्यालसरीसृपम् ।
परिक्लेशश्च वो मन्ये ध्रुवं तत्र भविष्यति ॥"*॥
जङ्गमे, त्रि । इति स्वामी ॥ यथा, भागवते । ५ । १८ । २७ ।
"पातुं न शेकुर्द्विपदश्चतुष्पद: ।
सरीसृपं स्थाणु यदत्र दृश्यते ॥")

सरु:, पुं, (सृ+उन् ।) त्सरु: । खड्गमुष्टि: । इत्यमरटीकासारसुन्दरी ॥

सरु:, त्रि, (सृ+उन् ।) सूक्ष्म: । इति भूरिप्रयोग: ॥

सरूप:, त्रि, (समानं रूपं यस्य । "ज्योतिर्जनपदेति ।" ६ । ३ । ८५ । इति समानस्य स: ।) सदृश: । समानरूप: । इति जटाधर: ॥ (यथा, मुण्डकोपनिषदि । २ । १ । १ ।
"यथा सुदीप्तात् पावकात् विस्फुलिङ्गा:
सहस्रश: प्रभवन्ते सरूपा: ।
तथाक्षराद्विविधा: सोम्य भावा:
प्रजायन्ते तत्र चैवापि यन्ति ॥")

सरूपता, स्त्री, (सरूपस्य भाव: । तल् । टाप् ।) समरूपत्वम् । तुल्यता । सरूपशब्दात् तप्रत्ययेनापि निष्पन्ना ॥

सरोजं, क्ली, (सरसि जायते इति । जन+ड: ।) पद्मम् । इति हेमचन्द्र: ॥ (यथा, कुमारे । ५ । २७ ।
"मुखेन सा पद्मसुगन्धिना निशि
प्रवेपमानाधरपत्रशोभिना ।
तुषारवृष्टिक्षतपद्मसम्पदां
सरोजसन्धानमिवाकरोदपाम् ॥")
सरोवरजाते, त्रि ॥

सरोजन्म, [न्] क्ली, (सरस: जन्म उत्पत्तिर्यस्य ।) पद्मम् । इति हेमचन्द्र: ॥

सरोजिनी, स्त्री, (सरोजानि सन्त्यस्यामिति । सरोज+"पुष्करादिभ्यो देशे ।" ५ । २ ।१३५। इति इनि: ।) कमलाकर: । पद्मम् । इति मेदिनी ॥ पद्मसमूह: । इति रत्नमाला ॥ (यथा, साहित्यदर्पणे । १० । ७०३ ।
"निसर्गसौरभोद्भ्रान्तभृङ्गसङ्गीतशालिनी ।
उदिते वासराधीशे स्मेराजनि सरोजिनी ॥")

सरोजी, [न्] पुं, (सरोजं उत्पत्तिस्थानत्वेनास्त्यस्येति । इनि: ।) ब्रह्मा । इति शब्दरत्नावलीत्रिकाण्डशेषौ ॥

सरोत्सव:, पुं, (सरे सरोवरे उत्सवो यस्य ।) सारसपक्षी । इति शब्दरत्नावली ॥

सरोध:, त्रि, रुद्ध: । रोधेन सह वर्त्तमान: । इति बहुव्रीहिसमासनिष्पन्न: ॥

सरोरुट्, [ह्] क्ली, (सरसि रोहतीति । रुह+क्विप् ।) पद्मम् । इति हेमचन्द्र: ॥

सरोरुहं, क्ली, (सरसि रोहतीति । रुह+क: ।) पद्मम् । इति रत्नमाला ॥ (यथा, भागवते । १ । १५ । २८ ।
"एवं चिन्तयतो जिष्णो: कृष्णपादसरोरुहम् ।
सौहार्द्देनातिगाढ़ेन शान्तासीद्विमला मति: ॥")

सरोरुहासन:, पुं, (सरोरुहमासनं यस्य ।) ब्रह्मा । इति हेमचन्द्र: ॥

सरोवर:, पुं, (सर:सु वर: श्रेष्ठ: पद्माकरत्वात् ।) जलाशयविशेष: । (यथा, भागवते ।८।२४।२१।
"तत आदाय सा राज्ञा क्षिप्ता राजन् सरोवरे ।
तदावृत्यात्मना सोऽयं महामीनोऽन्ववर्द्धत ॥")
तत्पर्य्याय: । पद्माकर: २ कासार: ३ तड़ाग: ४ तड़ाक: ५ तटाक: ६ सरस: ७ सरसी ८ सर: ९ सरम् १० सरकम् ११ । इति शब्दरत्नावली ॥ तल्लक्षणादि पुष्करिणीशब्दे द्रष्टव्यम् । तस्य जलगुणा: सर:शब्दे द्रष्टव्या: ॥

सर्क:, पुं, वायु: । मन: । प्रजापति: । इति संक्षिप्तसारोणादिवृत्ति: ॥

सर्ग:, पुं, (सृज्+घञ् ।) स्वभाव: । निर्म्मोच: । (यथा, महाभारते । १३ । १६२ । ३५ ।
"राजमार्गे गवां मध्ये धान्यमध्ये च धर्म्मिण: ।
नोपसेवन्ति राजेन्द्र सर्गं मूत्रपुरीषयो: ॥")
निश्चय: । (यथा, रघु: । ३ । ५१ ।
"गृहाण शस्त्रं यदि सर्ग एष ते
न खल्वनिर्जित्य रघुं कृती भवान् ॥")
अध्याय: । (यथा, साहित्यदर्पणे । ६ । ५५९ ।
'नातिस्वल्पा नातिदीर्घा: सर्गा अष्टाधिका इह ॥")
सृष्टि: । इत्यमर: । ३ । ३ । २२ ॥ (यथा, मनु: । १ । २९ ।
"हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्मावृतानृते ।
यद्यस्य सोऽदधात् सर्गे तत्तस्य स्वयमाविशत् ॥"
संसार: । यथा, गीतायाम् । ५ । १९ ।
"इहैव तैर्जित: सर्गो येषां साम्ये स्थितं मन: ॥")
मोह: । उत्साह: । इति मेदिनी ॥ अनुमति: । इति हेमचन्द्र: ॥ *॥ सर्गविवरणं यथा,—
"अव्याकृतगुणक्षोभात् महतस्त्रिवृतोऽहम: ।
भूतसूक्ष्मेन्द्रियार्थानां सम्भव: सर्ग उच्यते ॥"
इति श्रीभागवतम् ॥
नवधासर्गो यथा,—
"सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु य: ।
कालद्रव्यगुणैरस्य त्रिविध: प्रतिसंक्रम: ॥
आद्यस्तु महत: सर्गो गुणवैषम्यमात्मन: ।
द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदय: ॥
भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान् ।
चतुर्थ ऐन्द्रिय: सर्गो यस्तु ज्ञानक्रियात्मक: ॥
वैकारिको देवसर्ग: पञ्चमो यन्मयं मन: ।
षष्ठस्तु तमस: सर्गो यस्त्वबुद्धिकृत: प्रभो: ॥
षड़िमे प्राकृता: सर्गा वैकृतानपि मे शृणु ।
रजोभाजो भगवतो लीलेयं हरिमेधस: ॥
सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषाञ्च य: ।
वनस्पत्योषधिलतात्वक्सारा वीरुधो द्रुमा: ।
उत्स्रोतसस्तम:प्राया अन्त:स्पर्शा विशेषिण: ।
तिरश्चामष्टम: सर्ग: सोऽष्टाविंशद्विधो मत: ॥
अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिन: ।
गौरजो महिष: कृष्ण: शूकरो गवयो रुरु: ॥
द्विशफा: पशवश्चेमे अविरुष्ट्रश्च सत्तम ।
खरोऽश्वोऽश्वतरो गौर: शरभश्चमरी तथा ॥
एते चैकशफा: क्षत्त: शृणु पञ्चनखान् पशून् ।
श्वा शृगालो वृको व्याघ्रो मार्जार: शशशल्लकौ ॥
सिंह: कपिर्गज: कूर्म्मो गोधा च मकरादय: ।
कङ्कगृध्रवकश्येनभासभल्लकवर्हिण: ॥
हंससारसचक्राह्वकाकोलूकादय: खगा: ।
अर्व्वाक्स्रोतस्तु नवम: क्षत्तरेकविधो नृणाम् ॥
रजोऽधिका: कर्म्मपरा दु:खे च सुखमानिन: ।
वैकृतास्त्रय एवैते देवसर्गश्च सत्तम ॥